


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(7): 1316-1318
www.allresearchjournal.com
Received: 19-05-2017
Accepted: 23-06-2017

**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

**Corresponding Author:**
**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

# वैदिक–रुद्रतत्त्व–समीक्षणम्

## डॉ0 इन्द्रेश कुमार झा

**प्रस्तावना:**

अकारण करुणा वरुणालया खिलब्रह्माण्डा धिष्ठान–परात्परब्रह्मशिव एव मानवानां भावनानुसारं विभिन्नरूपेणागत्य तेषां कल्याणं विदधाति। तस्यैव परात्परब्रह्मपरमेश्वरस्य भगवतः शिवस्य स्वरूप–प्रतिपादनाय प्रवृत्तोऽस्ति वेदः। तत्र श्वेताश्वतरोपनिषदि जगतः मूलं कारणं किमिति जिज्ञासामुत्थाप्य तस्य समाधानमपि कृतमस्ति। यथा–

जगतः मूलं कारणं किमस्ति? तस्य कीदृक्स्वरूपम्? कुतो वयमुत्पन्नाः? केन जीवामः? कुत्र स्थिताः? केन प्रेरिताः सुख–दुःखरूपमनुवर्तयामः?[1]

> किं कारणं ब्रह्म कुतः स्म जाता
> जीवाम केन क्व च संप्रतिष्ठाः।
> अधिष्ठिताः केन सुखेतरेषु
> वर्तामहे ब्रह्मविदो व्यवस्थाम्।।

उपर्युक्तजिज्ञासानां निवृत्तये नान्यमुपायमवगत्य ऋषिभिः स्वयमेव ध्यानयोगेनानुभूतम्–यत्परमात्मा एक एव समेषां कारणानामधिष्ठानमस्ति। उक्तञ्च–

> यः ध्यानयोगानुगता अपश्यन्
> देवात्मशक्तिं स्वगुणैर्निगूढाम्।
> यः कारणानि निखिलानि तानि
> कालात्मयुक्तान्यधितिष्ठत्येकः।।[2]

तत्र कोऽयं परमात्मा समेषां कारणानामधिष्ठानमिति जिज्ञासायामुच्यते– यः शिव–रुद्रादिनामभिः शास्त्रेषु प्रसिद्धोऽस्ति, स एव समेषां कारणभूतोऽस्ति। यथा–
'एको हि रुद्रो न द्वितीयाय तस्थु
र्य इमॉल्लोकानीशत ईशनीभिः।

> प्रत्यङ्जनांस्तिष्ठति संचुकोचान्त
> काले संसृज्य विश्वा भुवनानि गोपाः।।[3]

स एकमात्रो रुद्रोऽस्ति, यः स्वीय–शक्तिभिः लोकान् शास्ति। स एव समेषां जीवानामन्तः बहिश्च स्थितोऽस्ति। स एव लोकान् संसृजति, पालयति, अन्ते चात्मन्यन्तर्लीनयति।
स एव सर्वदिङ्नेत्रयुक्तः सर्वदिक्पादयुक्तः सर्वदिग्–मुखयुक्तः सर्वदिग्बाहुयुक्तश्चास्ति। एकमात्र एव स भूर्लोकं भुवर्लोकं स्वर्लोकं च संसृजन् सुर–नर–तिर्यक्–स्थावरादिजीव–जन्तून् अक्षि–पद–मुखावयवैर्योजयति। रुद्र एव समस्तदेवतानामुत्पत्त्यैश्वर्यादीनां हेतुः जगत्पतिः सर्वज्ञश्चास्ति। स एव प्रथमः हिरण्यगर्भमुत्पादयामास। रुद्रस्य मूर्तिः मङ्गलमयी शान्ता पुण्य प्रकाशिनी पूर्णानन्दमयी चास्ति।[4] उक्तञ्च–

> या ते रुद्र शिवा तनूरघोरापापकाशिनी।
> तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।।

कस्मादुच्यते रुद्रः? यस्माद्दृषिभि द्रुतमस्य रूपमुपलभ्यते। अर्थात् हृदयस्थराग–द्वेष–ईर्ष्या–काम–क्रोधादिरूपं मलं ज्ञानै भस्ममयं कृत्वा शीघ्रमेव तत्रस्थितं रूपं ऋषिभिः

प्राप्यते। अथवा रुत्; शब्दस्यार्थो भवति ज्ञानं तद्राति= ददातीति रुद्रः। रु'इति दुःखनाम तद्रावयति=नाशयतीति रुद्रः। अथवा मानवानामनाचरणेन यदा असन्तुष्टाः भवन्ति तदा दुःखभोगेन रोदयतीति रुद्रः। यस्माद् न कश्चित्कनिष्ठो न वरिष्ठः, यं ज्ञात्वा मानवाः तरन्ति मृत्योः, येन सम्पूर्णं जगदिदं व्याप्तमस्ति तस्यैव परमात्मनो नामास्ति रुद्रः। स एव सर्वमुखः, सर्वशिरः, सर्वग्रीवः, सर्वव्यापी च रुद्रः सर्वमङ्गलमयत्वात्संसारेऽस्मिन् शिवशब्देन प्रार्थितोऽस्ति। श्तस्मात्सर्वगतः शिवः।[5]
स एवाग्निरस्ति, स एव सूर्योऽस्ति, स एव चन्द्रमास्ति, स एव वायुरस्ति, स एव शुक्रोऽस्ति, स एव प्रजापतिरस्ति। तस्यैव नामास्ति महेश्वरोऽपि। उक्तञ्च–

मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्।।[6]

यं सूक्ष्मातिसूक्ष्म विश्वस्यैकमात्रं स्रष्टारमनेकरूपं ज्ञात्वा मानवाः परमशान्तिमवाप्नुवन्ति स एव शिवनाम्ना जगद्वन्द्यो ऽस्ति। उक्तञ्च–

सूक्ष्मातिसूक्ष्म कलिलस्य मध्ये
विश्वस्य स्रष्ट्रारमनेकरुपम्।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा शिवं शान्तिमत्यन्तमेति।।[7]

मनुष्याः केन प्रकारेण मृत्युपाशांश्छिनत्तीत्युच्यते–स एव रुद्रः अतीतकल्पेषु विश्वरक्षकः आसीत्, स एव विश्वाधिपः सर्वभूतेषु च स्थितोऽस्ति, यस्मिन् परमात्मनि रुद्रे ब्रह्मर्षयो देवगणाश्चाभिन्नरूपेण स्थिताः सन्ति,तं परमात्मानं रुद्रं (शिवम्) एवं ज्ञात्वा मनुष्यः मृत्युपाशान् मृत्युरविद्या तमोरूपादयश्च पाशाः= पाश्यन्त इति पाशान् 'मृत्यु वै तमः'[8] इति श्रुतेः छिनत्ति= नाशयति। उक्तञ्च–

स एव काले भुवनस्य गोप्ता
विश्वाधिपः सर्वभूतेषु गूढः।
यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च
तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति।।

सर्वेषु भूतेषु सूक्ष्मातिसूक्ष्मः शिवोऽन्तर्यामिरूपेण घृतोपरि तत्सारतत्त्वं मण्डं यथा तिष्ठति तथैव स्थिरो भवतीति ज्ञात्वा तथा विश्वस्यैकमात्रं भोगप्रदं देवं (शिव) साक्षात्कारं कृत्वा पुरुषः बन्धनान्मुक्तो भवति। उक्तञ्च–

घृतात्परं मण्डमिवातिसूक्ष्म
शिवं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा देवं मुच्यते सर्वपापैः।।[11]

एवं ज्ञायते यद् भगवान् रुद्रः मूलतः एकैवास्ति, तथापि मानवानां रुचिवैभिन्न्याद् विभिन्नरूपेणावतीर्य तेषां कल्याणं करोतीति प्रथमस्तावद् एकादश रुद्रावतारोपाख्यानमुपस्थाप्यते–
अथैकदा दैत्येभ्यः पराजिताः इन्द्रादिदेवताः अमरापुरीतः पलायमानाः सन्तो महर्षिकश्यपाश्रममागत्य निजव्यथां न्यवेदयन्। तेषां निवेदनमाकर्ण्य भगवति शिवे श्रद्धान्वितः कश्यपः तत्कल्याणार्थं तान् आश्वासनं दत्वा विश्वनाथस्य नगरी वाराणसीमागत्य स्नानादि–नित्यकर्म समाप्य शिवस्य दर्शनार्थं शिवलिङ्गमेकं संस्थाप्य तपश्चकार। तत्तपरूप्रभावात् सन्तुष्टो भगवाञ्छिवः तत्पुरः प्रकटो जातः। भगवान् शिवः प्रसन्नः आसीदेव, अत उक्तवान्–वरं ब्रूहीति। महर्षिः कश्यपः भगवन्तं महेश्वरमवलोक्य तं संस्तुवन् प्रोक्तवान्–हे नाथ! महाबलिनो दैत्याः देवान् पराजित्य तान् व्यथयन्ति। अतस्त्वम्मम पुत्ररूपेणावतीर्य तद्व्यथां दूरीकुरु। उक्तञ्च–

भूत्वा मम सुतो नाथ देवा यक्षाः पराजिताः।
दैत्यै महाबलैश्शम्भो सुरानन्दप्रदो भव।।

ततो भगवान् शिवः 'तथास्तु' इत्युक्त्वा तत्रैवान्तर्हितो जातः। महर्षिः कश्यपोऽपि ततः निजाश्रममागत्य सर्ववृत्तान्तं देवान् कथयामास। सर्वे देवा अपि शिवावतारस्य प्रतीक्षायाम् एकाग्रचित्ता जाताः। भगवान् शिवोऽपि निजवचनं सत्यं कर्तुं कश्यपद्वारा सुरभीगर्भाद् एकादशरुद्ररूपेण प्रकटो जातः। एभिरेकादशरुद्रैः सर्वमिदं जगच्छिवमयं जातम्। महर्षिणा कश्यपेन सह सर्वेऽपि देवाः हर्षोत्फुल्लिताः जाताः। एतेषां रुद्राणां नामानि सन्ति–कपाली, पिंगलः, भीमः, विरूपाक्षः, विलोहितः, शास्ता, अजपादः, अहिर्बुध्न्यः, शम्भुः, चण्डः, भवश्च।

एते एकादश रुद्राः देवानां कार्यसिद्धयर्थमुत्पन्नाः।[12]
उक्तञ्च–एकादशैते रुद्रास्तु सुरभीतनयाः स्मृताः।
देवकार्यार्थमुत्पन्नाश्शिवरूपास्सुखास्पदम्।।

एते एकादशरुद्राः महद्–बल–पराक्रम–सम्पन्नाः आसन्। एते सङ्ग्रामे दैत्यान् निहत्य पुनरिन्द्रं स्वर्गाधिपतिरूपेणाभिषिक्तवान्। एते शिवरूपधारि– एकादशरुद्राः इदानीमपि देवानां रक्षायै स्वर्गे विराजमानाः सन्ति। विभिन्नपुराणेषु एतेषां नामसु वैभिन्न्यमपि दृश्यते। श्रीमद्भागवतानुसारमेतेषां नामानि सन्ति[13]–
मन्युः, मनुः, महिनसः, महान्, शिवः, ऋतध्वजः, उग्ररेता, भवः, कालः, वामदेवः, धृतव्रतश्च।

**भगवतः शिवस्यार्द्धनारीश्वररूपस्य विवेचनम्**
अनेकेषां शास्त्र–पुराणादीनामध्ययनेन एवं प्रतीयते यत् आशुतोषस्य भगवतः शिवस्यार्द्धनारीश्वरस्वरूपं परात्पर–जगत्पितुः दयामय्याः जगन्मातुश्च आदिसम्बन्धभावस्य द्योतकोऽस्ति। सृष्टिकाले परमपुरुषः स्वस्मादेवाङ्गात् प्रकृतिं बहिःनिष्कास्य तस्यां समस्तसृष्टिमुत्पादयति। उक्तञ्च–

द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत्।
अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः।।

भगवतः शिवस्य सत्यस्वरूपं तस्य मातृस्वरूपमस्ति चित्स्वरूपं तस्य पितृस्वःपमस्ति। तृतीयमानन्दरूपं तत्स्वरूपमस्ति यस्मिन् द्वयोर्मातृ–पितृभावयोः सामञ्जस्यं भवति, तदेव शिवशक्तयोः संयुकतरूपम् अर्द्धनारीश्वरस्वरूपमस्ति। सत्' चित्' आभ्यां द्वाभ्यां सह तृतीयस्य आनन्दरूपस्य दर्शनम् अर्द्धनारीश्वररूपेणैव भवति, यत् शिवस्य सर्वोत्तमरूपं वक्तुं शक्यते।
सत्' चित्' आनन्दम्श्परमेश्वरस्य एतेषु त्रिषु रूपेषु आनन्दम् अर्थात् साम्यावस्था अक्षुब्धभावो वा भगवतः शिवस्यैवास्ति। मनुष्योऽपि परमेश्वरादुत्पन्न– स्तस्यैवांशोऽस्ति, अतः तदन्तः अपि रूपत्रयं विद्यमानमस्ति। तत्र स्थूलशरीरं तस्य सदंशोऽस्ति तथा बाल्यचेतना चिदंशोऽस्ति। यद्वा द्वयं मिलित्वा परमात्मनः स्वरूपस्योपलब्धिं कारयति तदा तस्यानन्दांशस्याभिव्यक्तिर्भवति। एवम्प्रकारेण मनुष्येऽपि सत्–चित्श्तत्त्वयोः प्रतिष्ठया आनन्दस्योत्पत्तिर्भवति।
स्त्रीपुरुषश्चेति द्वौ ईश्वरस्य प्रतिकृती स्तः। स्त्री तस्य सद्श्रूपं पुरुषश्च चिद्श्रूपमस्ति। परमानन्दस्य दर्शनं तदैव भवति, यदा द्वयं मिलित्वा एकःपं भवति। शिवः यद्यपि समेषाम् ईश्वरोऽस्ति परन्तु गृहस्थानाम्परमेश्वरोऽस्ति, विवाहितानां परमोपास्यदेवोऽस्ति। शिवः स्त्रीपुरुषयोः पूर्णैकतायाः अभिव्यक्तिरस्ति। अतः दृश्यते लोके स्त्रियः सदैव शिवपूजनं कुर्वन्ति। विशेषरूपेण मिथिलायां यदा नवविवाहिताः युवत्यः गीतं गायन्त्यः एकीभूय पुष्पाभरणैः

शिवपूजनाद्युपकरण– हस्तैर्मन्दिराभिमुखं शनैः शनैगच्छन्ति तदा दर्शकास्ता अवलोक्यैव शिवपूजन– फलमवाप्नुवन्ति।
भगवतः शिवस्यार्द्धनारीस्वरूपस्यावतरणस्याख्यानम्– विभिन्नशास्त्र–पुराणानुसारं सृष्ट्यारम्भे लोकपितामहो ब्रह्मा सनक–सनन्दनादिचतुरः पुत्रान् एवं विचार्योत्पादयामास यदेते चत्वारः मानसिकसृष्टिमेव वर्द्धयिष्यन्ति। परन्तु एतत्कार्ये एतेषां चतुर्णामसमर्थतामवलोक्य ब्रह्मा साम्बशिवं त्र्यम्बकेश्वरं हृदि चिन्तयन् तपश्चर्तुं संल्लग्नो बभूव। तत्तपश्चर्यातः सन्तुष्टः शिवः स्वीय–अनिर्वचनीयांशतोऽर्द्ध– नारीश्वररुपेण प्रादुर्बभूव।[15] उक्तञ्च–

> तया परमया शक्तया भगवन्तं त्रियम्बकम्।
> सञ्चिन्त्य हृदये ब्रह्मा तताप परमं तपः।।
> तीव्रण तपसा तस्य युक्तस्य परमेष्ठिनः।
> अचिरेणैव कालेन पिता सम्प्रतुतोष ह।।
> ततः केन चिदंशेन मूर्तिमाविश्य कामपि।
> अर्द्धनारीश्वरो भूत्वा ययौ देवस्स्वयं हरः।।

ततो लोकपितामहो ब्रह्मा भगवतः शिवस्य अर्द्धनारीश्वरस्वरूपमवलोक्य प्रणम्य प्रार्थितवान्। महादेवोऽपि सन्तुष्टः प्रोक्तवान्–ब्रह्मन्! प्रजावृद्धये तव प्रयासः सफलो भविष्यतीति वरं प्रयच्छामि। इत्युक्त्वा निजवामाङ्गतः आत्मनः शक्तिं भगवतीं रुद्राणी प्रकटयामास। इत्यवलोक्य ब्रह्मा ताम् सम्प्रार्थ्य न्यवेदयत्–जगन्मातः देवि! बारम्बारम्प्रयासेनापि न वर्द्धते मानसिकसृष्टिः। मैथुनीसृष्टिकरणेऽसमर्थोऽहमस्मि। अतस्त्वम्प्रजावृद्धिहेतोः मत्पुत्रस्य दक्षस्य पुत्रीरूपेण प्रादुर्भूय प्रजाम्वर्द्धय। ततः सापि निजभ्रवमध्यतः निजसमां कान्तिमतीं शक्तिमुत्पादितवती। सा एव शक्तिः शिवाज्ञया दक्षपुत्री जाता। भगवती रुद्राणी अपि पुनः महादेवशरीरे प्रविष्टा।
एवम्प्रकारेण भगवतः शिवस्यार्द्धनारीस्वरस्वरूपेणैव सृष्टिरुत्पन्ना। भगवाञ्छिवः अर्द्धनारीश्वरस्वरूपेण एवमुपदिशति यत् सर्वेऽपि पुरुषाः शिवस्यांशभूताः सन्ति, नार्यश्च भगवत्याः शिवायाः अंशभूताः सन्ति। तेनैव भगवता अर्द्धनारीश्वरस्वरूेपेण चराचरजगदिदं व्याप्तमस्ति। उक्तञ्च–

> ईशावास्यमिद सर्वं यत्किञ्च जगत्याञ्जगत्।[16]

## संदर्भ


1. श्वे. उ. 1/1
2. श्वे. उ. 1/3
3. श्वे. उ. 3/2
4. श्वे. उ. 3/5
5. शु. यजु. 16/1
6. श्वे. उ. 3/11
7. श्वे. उ. 4/2
8. श्वे. उ. 4/10
9. श्वे. उ. 4/14
10. बृ. उ. 1.3.28
11. श्वे उ. 4/16
12. शि.पु.रु.सं. 18/20
13. शि.पु.रु.सं. 18/27
14. श्रीमद्भागवत–3.12.12
15. शि.पु.वायवीयसं. पूर्वार्द्ध– 15/7–9
16. पुल्लिंगं सर्वमीशानं स्त्रीलिंगं विद्धि चाप्युमाम्।
17. द्वाभ्यां तनुभ्यां व्याप्तं हि चराचरमिदं जगत्।।
18. शु.यजु. 40/1